सोगं ग्रं.नं.१२८

संस्कृत

# गंगाष्टक

६९८/स्तो.५७

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

# अथगंगाष्टकप्रारंभः

Courtesy of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2)





श्रीगणेशायनमः॥ अथगंगाष्टकप्रारंभः॥ मातःशैलसुतासपत्निवसुधाशृंगारहारावलीस्वर्गारोहणवैजयंति-
भवतींभागीरथींप्रार्थये॥ त्वत्तीरेवसतस्त्वदंबुपिबतस्त्वद्वीचिषुप्रेंखतस्त्वन्नामस्मरतस्त्वदर्पितदृशःस्या
न्मेशरीरव्ययः॥ १॥ त्वत्तीरेतरुकोटरांतरगतोगंगेविहंगोवरंत्वन्नीरेनरकांतकारिणिवरंमत्स्योथवाकच्छपः॥नै
वान्यत्रमदांधसिंधुरघटासंघट्टघंटारणत्कारत्रस्तसमस्तवैरिवनितालब्धस्तुतिर्भूपतिः॥ २॥ उक्षापक्षीतुरगउर
गोकोपिवावारणोवावाराणस्यांजननमरणक्लेशदुःखासहिष्णुः॥ नत्वन्यत्रप्रविरलरणत्किंकिणीक्वाणमिश्रंवा
रस्त्रीभिश्चमरमरुतावीजितोभूमिपालः॥ काकैर्निष्कुषितंश्वभिःकवलितंगोमायुभिर्लुंठितंस्रोतोभिश्चलितंतटांबु
लुलितंवीचीभिरांदोलितं॥ दिव्यस्त्रीकरचारुचामरमरुत्संवीज्यमानःकदाद्रक्षेहंपरमेश्वरित्रिपथगेभागीरथीस्वंवपुः
॥ ४॥ अभिनवबिसवल्लीपादपद्मस्यविष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला॥ जयतिजयपताकाकाप्यसौमो-
क्षलक्ष्म्याःक्षपितकलिकलंकाजाह्नवीनःपुनातु॥ ५॥ एतत्तालतमालसालसरलव्यालोलवल्लीलताछन्नंसूर्यक

(3)





रम्यतापरहितंशंरवेंदुकुंदोज्वलं॥गंधर्वामरसिद्धकिन्नरवधूतुंगस्तनास्फालितंस्नानायप्रतिवासरंभवतुमेगांगं
जलंनिर्मलं॥ ६॥गांगंवारिमनोहारिमुरारिचरणच्युतम्॥त्रिपुरारिशिरश्चारिपापहारिपुनातुमां॥ ७॥पापाप-
हारिदुरितारितरंगधारिशैलप्रचारिगिरिराजगुहाविदारी॥झंकारकारिहरिपादरजोपहारिगांगंपुनातुसततं
शुभकारिवारि॥ ८॥भगवनिनवनीरैर्नीरमात्राशनोहंविगतविषयतृष्णाकृष्णामाराधयामि॥सकलकलुषभंगेस्व
र्गसोपानसंगेप्रचुरतरतरंगेदेविगंगेप्रसीद॥ ९॥गंगाष्टकंपठतियःप्रयतःप्रभातेवाल्मीकिनाविरचितंशुभदंम
नुष्यः॥प्रक्षाल्यगात्रकलिकल्मषपंकमाशुमोक्षंलभेत्पततिनैवनरोभवाब्धौ॥ १०॥विष्णुपादाब्जसंभूतेगंगे-
त्रिपथगामिनी॥धर्मद्रवेतिविख्यातेपापंमेहरजान्हवि॥ ११॥ ॥इतिश्रीवाल्मीकिनाविरचितंगंगाष्टकंसंपूर्णम्॥

हें पुस्तक पुणें पेठ शनवार येथें वेदांतप्रकाश छापखान्यांत काशिनाथ महादेव थत्ते यांनीं छापून प्रसिद्ध केलें.
आवृत्ति २री. ता० १ माहे सप्तंबर सन् १८८१ किंमत ८८६

(५)

॥ इतिगंगाष्टक समाप्तः ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com